पारस्कर विवाह मन्त्राः

१.४.१३. जरां गच्छ परिधत्स्व वासो भवाकृष्टीनामभिशस्तिपावा ।
शतं च जीव शरदः सुवर्च्चा रयिं च पुत्राननुसंव्ययस्व ॥

१.४.१४. या अकृन्तन्नवयँय्या अतन्वत याश्च देवीस्तन्तूनभिता ततन्थ ।
तास्त्वा देवीर्जरसे सव्ययस्वायुष्मतीदं परिधत्स्व वासः ॥

१.४.१५. समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ ।
सम्मातरिश्वा सन्धाता समु देष्ट्री दधातु नौ ॥

१.४.१६. यदौषि मनसा दुरं दिशोऽनु पवमानो वा ।
हिरण्यपर्णो वैकर्णः स त्वा मन्मनसां करोत्वित्यसौ ॥

१.४.१७. अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्च्चाः ।
वीरसूर्द्देवकामा स्योना शन्नो भव द्विपदे शं चतुष्पदे ॥
सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः ।
तृतीयोग्निष्टे प्रतिस्तुरीयस्ते मनुष्यजाः ॥
सोमोऽददद् गन्धर्वाय, गन्धर्वोददद्ग्नये ।
रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम् ॥
सा नः पूषा शिवतमामैरय सा न ऊरू उशती विहर ।
यस्यामुशन्त प्रहराम शेपं यस्यामु कामा बहवोनिविष्ट्या ॥

१.५.९. चित्तं च चित्तिश्चाकूतं चाकूतिश्च विज्ञातं च विज्ञातिश्च मनश्च शक्वरीश्च दर्शश्च पौर्णमासं च बृहच्च रथन्तरं च । प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाजयेषु । तस्मै विशः समनमन्त सर्वाः स उग्रः स इहव्यो बभूव स्वाहा ॥

१.५.१०. अग्निर्भूतानामधिपतिः स माऽवत्विन्द्रो ज्येष्ठानां, यमः पृथिव्या, वायुरन्तरिक्षस्य, सूर्यो दिवश्चन्द्रमा नक्षत्राणां, बृहस्पतिब्रह्मणे, मित्रः सत्यानां, वरुणोऽपाम्, समुद्रः स्रोत्यानामन्नटम् साम्राज्यानामधिपति तन्मावतु, सोम ओषधीनां, सविता प्रसवानाम्, रुद्रः पशूनां, त्वष्टा रूपाणां, विष्णुः पर्वतानां, मरुतो णानामधिपतयस्ते मावन्तु पितरः पितामहाः परेवरे ततास्ततामहाः । इह मावन्त्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोघायामास्मिन्कर्मण्यस्यां दवेहूत्याम् स्वाहा ॥

१.५.११. अग्निरैतु प्रथमो देवतानाम् सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात् । तदयं राजा वरुणोऽनुमन्यतां यथे‌ं स्त्री पौत्रमघं न रोदात्स्वाहा । इमामग्निस्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः । अशून्योपस्था जीवतामस्तु माता

पौत्रमानन्दमभिविबुध्यामियाम् स्वाहा । स्वस्ति नो अग्ने दिव आपृथिव्या विश्वानि धेह्ययथा यजत्र । यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्रम् स्वाहा । सुगन्न पन्थां प्रदिशन्न एहि ज्योतिष्मद्धेह्यजरन्न आयुः । अपैतु मृत्युरमृतश्च आगाद्वैवस्वतो नो अभयं कृणोतु स्वाहा ॥

१.६.२. अर्यमणं देवं कन्याऽग्निमवक्षत ।
स नो अर्यमा देवः प्रेतो मुञ्चतु मा पतेः स्वाहा ॥
इयं नार्युपब्रूते लाजानावपन्तिका ।
आयुष्मानस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा ॥
इमाँल्लाजानावपाम्यग्नौ समृद्धिकरणं तव ।
मम तुभ्य च संवननं तदग्निरनुमन्यतामियम् स्वाहा ॥

१.६.३. गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथाऽऽसः ।
भगोऽऽर्यमा सविता पुरन्धिर्मह्यं त्वाऽदुर्गार्हपत्याय देवाः ॥
अमोऽहमस्मि सा त्वं सा त्वमस्यमोऽहम् । सामाहमस्मि ऋक्त्वं द्योरहं पृथिवी त्वं तावेहि विवहावहै । सह रेतो दधावहै प्रजां प्रजनयावहै पुत्रान् विन्द्यावहै । बहून् ते सन्तु जरदष्टयः संप्रियौ रोचिष्णु सुमन्स्यमनु । पश्येम शरदः शतं जीवेम शरदः शतं श्रुणुयाम शरदः शतम् ॥

१.७.१. आरोहममश्मानमश्मेव त्वं स्थिरा भव ।
अभितिष्ठ पृतन्यतोऽवबाधस्व प्रुतनायत ॥

१.७.२. सरस्वति प्रेदमव सुभगो वाजिनीवती । या त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः । यस्यां भूतं समभवद्यस्यां विश्वमिदं जगत् । तामध्य गाथां गास्यामि या स्त्रीणामुत्तमं यश ॥

१.७.३. तुभ्यमग्रे पर्यवहन्सूर्यां वहतु ना सह ।
पुनः पतिभ्यो जायां दाग्ने प्रजया सह ॥

१.८.१. एकमिषे विष्णुस्त्वान्नयतु । द्वे ऊर्जे विष्णुस्त्वान्नयतु । त्रीणि रायस्पोषाय विष्णुस्त्वान्नयतु । चत्वारि मायोभवाय विष्णुस्त्वान्नयतु । पञ्च पशुभ्यः विष्णुस्त्वान्नयतु । षड् ऋतुभ्यः विष्णुस्त्वान्नयतु । सखे सप्तपदा भव सा मामनुव्रता भव ॥

१.८.५. आपः शिवाः शिवतमाः शान्ताः ।
शान्ततमास्तास्ते कृण्वन्तु भेषजम् ॥

१.८.६. आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥
१.८.७. तच्छक्षुर्देवहितं पुरस्ताच्छुक्रमच्चुरत् ।
पश्येम शरदः शतं जीवेम शरदः शतं श्रृणुयाम शरदः शतं प्रबवाम शरदः शतं शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥
१.८.८. मम व्रते ते हृदयम् दधामि मम चित्तमनुचित्तं ते अस्तु ।
मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यम् ॥
१.८.९. सुमङ्गलीरियं वधूरिमाम् समेत पश्यत ।
सौभाग्यमस्यै दत्त्वा यथाऽस्तं विपरेतन ॥
१.८.१०. इह गावो निषिदन्त्विहाश्वा इह पूरुषाः ।
इहो सहस्रदक्षिणो यज्ञ इह पूषा निषीदतु ॥
१.८.१९. ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्ये मयि ।
मह्यं त्वाऽदाद् बृहस्पतिर्मया पत्या प्रजावती संजीव शरदः शतम् ॥
१.९.६. पुमाँसौ मित्रवरुणौ पुमाँसाविश्विनावुभौ ।
पुमानिन्द्रश्च सूर्यश्च पुमाँसं वर्ततां मयि पुनः ॥
१.११.२. अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा । वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा । सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा । चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै गृहघ्नी तनूस्तामस्यै नाशय स्वाहा । गन्धर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्वा नाथकाम उपधावामि याऽस्यै यशोघ्नी तनूस्तामस्यै नाशय स्वाहेति ॥
१.११.४. या ते पतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी यशोघ्नी निन्दिता तनूर्जारघ्नीं तत एनां करोमि सा जीर्य त्वं मया सह ॥
१.११.५. प्राणैस्ते प्राणान्त्संदधाम्यस्थिभिरस्थीनि माँसैर्माँसानि त्वचा त्वचम् ॥